Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ओं गणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

।। यजुर्वेद त्रिकाल सन्ध्यावन्दनम् ।।

(समिदाधानम्-ब्रह्मयज्ञम्-
यजुरुपाकर्म विषयाश्च)

For copies of this book please contact-
Shri Parameswara Sharma
14/52 Manjula, Pestom Sagar
Chembur, Mumbai - 400 089
Tel: 524 2155.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ओं गणेश शारदा गुरुभ्यो नमः ।।

।। श्री वेदव्यासाय नमः ।।

।। यजुर्वेद त्रिकाल सन्ध्यावन्दनम् ।।

(समिदाधानम्-ब्रह्मयज्ञम्-
यजुरुपाकर्म विषयाश्च)

For copies of this book please contact-
Shri Parameswara Sharma
14/52 Manjula, Pestom Sagar
Chembur, Mumbai - 400 089
Tel: 524 2155.

For Private Circulation Only

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। श्री शृङ्गेरी श्रीजगद्गुरुमहासंस्थानम् ।।

श्रीमत्परमहंसपरिव्राचकाचार्यवर्य पदवाक्यप्रमाणपारावारपारीण यमनियमासनप्राणायाम प्रत्याहार धारणाध्यानसमाध्यष्टाङ्गयोगानिष्ठाननिष्ठ तपश्चक्रवर्त्यनाद्यविच्छिन्न श्रीशङ्कराचार्यगुरुपरम्पराप्राप्त षड्दर्शनस्थापनाचार्य व्याख्यानसिंहासनाधीश्वर सकलनिगमागमसारहृदय सांख्यत्रयप्रतिपादक वैदिकमार्ग प्रवर्तक सर्वतन्त्र-स्वतन्त्रादिराजधानी विद्यानगर महाराजधानी कर्णाटकसिंहासन प्रतिष्ठापनाचार्य श्रीमद्राजाधिराजगुरुभूमण्डलाचार्य ऋष्यशृङ्गपुरवराधीश्वर तुङ्गभद्रातीरवासि श्रीमद्विद्याशङ्करपादपद्माराधक श्रीजगद्गुरु श्रीमदभिनवविद्यातीर्थस्वामि गुरुकरकमलसञ्जात

।। श्रीजगद्गुरु शृङ्गेरी श्रीमद्भारतीतीर्थस्वामिभिः ।।

अस्मदत्यन्तप्रियशिष्य श्रीपरमेश्वरशर्म विषये नारायणस्मरणपुरस्सर विरचिता आशिषस्समुल्लसन्तु।

भवन्तः वेदमधीत्य शिष्यानध्यापयन्तः अधुना लोकानामुपकाराय अत्यावश्यक वेदभागान् स्थूलाक्षरैः सस्वरं प्रकाशयन्तीति विदित्वा भृशं मोदामहे। अत्र हि रुद्रक्रमः महान्यासः उदकशान्तिरित्यादयः प्रकाशिता ये सर्वेषामत्यन्तमावश्यकाः। भवदीयोऽयमुद्यमः धर्मश्रद्धालूनामास्तिकानां प्रशंसापात्रमिति तु निश्चप्रचम्।

श्री शारदाचन्द्रमौळीश्वरयोरसीमया कृपया इमे ग्रन्थाः आस्तिकजन पाणिपल्लवान्यलंकुर्वन्तु भवन्तश्च श्रेयःपरम्पराभिस्समेधन्तामित्याशास्महे।।

इति नारायणस्मरणम्

शृङ्गगिरिः
प्रमाथिश्रावणकृष्णाष्टमी भार्गववासरः
३-९-१९९९

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

SRI GURUBHYO NAMAHA

MUTUAL TRUST — FRIENDSHIP — TOLERANCE—OUR TRADITION

Sri Sankara Jayanthi Celebration Committee

6, Savitha, 70,Pestomsagar, 2nd Road, Tilaknagar P.O., BOMBAY - 89.
Tel. Nos. : 5241864

Date .....

FOREWORD

Shri Parameswara Sharma has been conducting Veda Classes in Pestom Sagar Chembur, for over two decades, and has trained over a hundred vidyarthis comprising of a wide range of asthikas covering school children, college boys, office-goers and retired elders. He has been associated with our Shri Sankara Jayanthi Celebration Committee for the past 16 years conducting Rudra-japa-abhisheka-puja along with his disciples.

Shri Parameswara Sharma's teaching skill and the recitation of vedic hymns by his disciples have been appreciated by many eminent vedic scholars and patrons of Religious & Cultural Organisations.

A momentous occasion was in June 1994, when, pleased with the excellent Ghana recitation by a few of Parameswara Sharma's young disciples,and in appreciation of his glorious spiritual service,HisHoliness Shri Bharathi Theertha Swamigal, Sringeri Mutt blessed and honoured him with a *'Ponnadai'*.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

Besides conducting veda classes, Shri Parameswara Sharma devotes his available time in compiling Vedic Literature into convenient books, in bold print, very useful to vidyarthis and religious practioners. He has compiled the following books :-

RUDRAM -CHAMAKAM
RUDRA KRAMAM
CHAMAKA KRAMAM
MAHANYASAM
UDAKA SHANTHI
ACHIDRAM
ASWAMEDHAM (1)

Copies of books compiled by Parameswara Sharma were presented to HIS HOLINESS SHRI BHARATHI THEERTHA SWAMIGAL, for His approval & blessings. His Holiness has gone through the books and has expressed His happiness and said that the books are very good and would be useful to the students

Appreciating his effort & dedication, His Holiness has blessed Shri Parameswara Sharma with a *SHREEMUKHAM.*

I, on behalf of the Sri Sankara Jayanthi Celebration Committee, pray to Almighty to bestow upon Shri Parameswara Sharma, a healthy, blissful and long life to continue his noble social service of propagating Vedas and Vedic Culture among the youth and active citizens.

V. Venkitachalam

V. Venkitachalam
Secretary
Sri Sankara Jayanthi Celebration Committee

13th September 1999.

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। विषयानुक्रमणिका ।।

०१.	त्रिकाल सन्ध्यावन्दनम्	०१-०७
०२.	त्रिकालसन्ध्या गायत्री जपः	०८-२०
०३.	समिदाधानम्	२१-२६
०४.	यज्ञोपवीत धारण विधिः	२७-
०५.	ब्रह्मयज्ञविधिः	२८-३२A
०६.	काममन्यु मन्त्रजपः	३३-३४
०७.	महासङ्कल्पः	३५-३९
०८.	काण्डऋषि तर्पणम्	४०-
०९.	गायत्री जपविधिः	४१-

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकाल सन्ध्यावन्दनम् ।।

०१. आचमनम्।।

ओं अच्युताय नमः। अनन्ताय नमः। गोविन्दाय नमः।

केशव।	नारायण।
माधव।	गोविन्द।
विष्णो।	मधुसूदन।
त्रिविक्रम।	वामन।
श्रीधर।	हृषीकेश।
पद्मनाभ।	दामोदर।

०२. विघ्नेश्वर प्रार्थना।।

शुक्लांबरधरं विष्णुं शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये।।

०३. प्राणायामः।।

ओं भूः। ओं भुवः। ओं ७ सुवः। ओं महः। ओं जनः। ओं तपः। ओ७ सत्यम्। ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। ओमापो

CC-0:Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकाल सन्ध्यावन्दनम् ।।

ज्योतीरसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम्।।

०४. सङ्कल्पः।।

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं

०४.१ (*प्रातःकाले*) प्रातस्सन्ध्यामुपासिष्ये।।

०४.२ (*मद्धाह्ने*) माद्ध्याह्निकं करिष्ये।।

०४.३ (*सायंकाले*) सायं सन्ध्यामुपासिष्ये।।

०५. जल देवता स्तुतिः।।

आपो वा इदꣳ सर्वं विश्वा भूतान्यापः प्राणा वा आपः पशव आपोऽन्नमापोऽमृतमाप-स्सम्राडापो विराडाप-स्स्वराडाप-श्छन्दाꣳस्यापो ज्योतीꣳष्यापो यजूꣳष्याप-स्सत्यमाप-स्सर्वा देवता आपो भूर्भुवस्सुवराप ओम्।। श्री केशवाय नमः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकाल सन्ध्यावन्दनम् ।।

०६. मार्जनम्।।

आपो हिष्ठा मयोभुवः। ता न ऊर्जे दधातन। महे रणाय चक्षसे। यो वश्शिवतमो रसः। तस्य भाजयतेह नः। उशतीरिव मातरः। तस्मा अरङ्गमाम वः। (*इति शिरसि मार्जयित्वा*)। यस्य क्षयाय जिन्वथ। (*इति पादयोः मार्जयित्वा*) आपो जनयथा च नः।। (*इति पुनः शिरसि मार्जयित्वा*)। भूर्भुवस्सुवः। (*इत्यात्मानं परिषिच्य*)।।

०७. अपः प्राशनम्।।

०७.१ (प्रातः)

सूर्यश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यद्रात्रिया पापमकारषम्। मनसा वाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकाल सन्ध्यावन्दनम् ।।

रात्रिस्तदवलुंपतु। यत्किञ्च दुरितं मयि। इदमहं माममृत योनौ। सूर्ये ज्योतिषि जुहोमि स्वाहा।।

०७.२ *(मद्ध्याह्ने)*

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम्। पुनन्तु ब्रह्मणस्पति र्ब्रह्म पूता पुनातु माम्। यदुच्छिष्टम-भोज्य य्यँद्वा दुश्चरितं मम। सर्वं पुनन्तु मामापोऽसताञ्च प्रतिग्रहꣳस्वाहा।।

०७.३ (सायं काले)

अग्निश्च मा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षन्ताम्। यदह्ना पापमकारषम्। मनसा वाचा हस्ताभ्याम्। पद्भ्यामुदरेण शिश्ना। अहस्तदवलुंपतु। यत्किञ्च दुरितं मयि। इदमहं माममृत योनौ। सत्ये ज्योतिषि जुहोमि स्वाहा।। *(इत्यपः प्राश्य)।।*

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकाल सन्ध्यावन्दनम् ।।

आचम्य।।

०८. मार्जनम्।।

दधिक्राव्णो अकारिषम्। जिष्णोरश्वस्य वाजिनः। सुरभिनो मुखाकरत्। प्रण आयूंषि तारिषत्।।

आपो हिष्ठा मयोभुवः। ता न ऊर्जे दधातन। महे रणाय चक्षसे। यो वश्शिवतमो रसः। तस्य भाजयतेह नः। उशतीरिव मातरः। तस्मा अरङ्गमाम वः। *(शिरसि मार्जयित्वा)*। यस्य क्षयाय जिन्वथ। *(पादयोः मार्जनम्)*। आपो जनयथा च नः। (शिरसि मार्जनम्)। भूर्भुवस्सुवः। (आत्मानं परिषिच्य)।।

०९. अर्घ्य प्रदानम्।।

ओं भूर्भुवस्सुवः। तत्सवितु-र्वरेणियम्। भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकाल सन्ध्यावन्दनम् ।।

०९.१ (प्रातः) ३ अर्घ्यम्।

०९.२ (मद्ध्याह्ने २ अर्घ्यम्।

०९.३ (सायं काले) ३ अर्घ्यम्।

१०. प्राणायामः।

११. प्रायश्चित्तार्घ्यम्।

कालातीत प्रायश्चित्तार्घ्यं करिष्ये।।

(सव्याहृत्या गायत्र्याऽभिमन्त्रितं अर्घ्यमेकं दत्वा।)

(सजलेन पाणिना सकृत्प्रदक्षिणं कृत्वा)

असावादित्यो ब्रह्म। ब्रह्मैवाहमस्मि।।

(इति आत्मानं ध्यात्वा। हृदयमभिमृश्य।) आचम्य।।

१२. तर्पणम्।।

आदित्यं तर्पयामि। सोमं तर्पयामि। अङ्गारकं तर्पयामि। बुधं तर्पयामि। बृहस्पतिं तर्पयामि। शुक्रं तर्पयामि। शनैश्चरं तर्पयामि। राहुं तर्पयामि। केतुं तर्पयामि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकाल सन्ध्यावन्दनम् ।।

केशवं तर्पयामि। नारायणं तर्पयामि। माधवें तर्पयामि। गोविन्दं तर्पयामि। विष्णुं तर्पयामि। मधुसूदनं तर्पयामि। त्रिविक्रमं तर्पयामि। वामनं तर्पयामि। श्रीधरं तर्पयामि। हृषीकेशं तर्पयामि। पद्मनाभं तर्पयामि। दामोदरं तर्पयामि।। (इति तर्पयित्वा) ।। आचम्य।।

ओं तत्सद्ब्रह्मार्पणमस्तु।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

०१. नमस्कारः।।

नमो ब्रह्मण्यदेवाय गो ब्राह्मण हिताय च।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः।।
आब्रह्मलोकादाशेषात् आलोका लोकपर्वतात्।
ये वसन्ति द्विजा देवाः तेभ्यो नित्यं नम नमः।।
(इति नमस्कृत्य)

अपसर्पन्तु ते भूताः ये भूता भुवि संस्थिताः।
ये भूता विघ्नकर्तारः ते गच्छन्तु शिवाज्ञया।।
(इति वामपादेन भूमौ घातत्रयं कृत्वा)।

उग्रभूता पिशाचाद्या ये च वै भूमिधारकाः।
एतेषामविरोधेन ब्रह्मकर्म समारभे।।
(इति संप्रार्थ्य)

०२. आसन मन्त्रः।।

पृथिव्यामेरुपृष्ठ ऋषिः। सुतलं छन्दः। कूर्मो देवता। आसने विनियोगः।। *(इत्यासनमास्थाय)*।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

पृथ्वि त्वया धृता लोका देव त्वं विष्णुना धृता।
त्वं च धारय मां नित्यं पवित्रं कुरु चासनम्।।

गुरुभ्यो नमः। (इत्युरसि अञ्जलिं कृत्वा)।
गणपतये नमः। सरस्वत्यै नमः। (इति दक्षिणाऽ०से)
दुर्गायै नमः। क्षेत्रपालकाय नमः। (इति वामाऽ०से) ।।

०३. विघ्नेश्वर प्रार्थना।
शुक्लांबरधरं.....उपशान्तये।।

०४. प्राणायामः।।
ओं भूः.....भूर्भुवस्सुवरोम्।।

०५. सङ्कल्पः।।
ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं ...*...गायत्री महामन्त्र जपं करिष्ये।।

(प्रातः)- *प्रातस्सन्ध्या
(मद्ध्याह्ने)- *माद्ध्याह्निक
(सायंकाले)- *सायं सन्ध्या

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

०६, प्राणायामः।।

प्रणवस्य ऋषिर्ब्रह्म। देवी गायत्री छन्दः। परमात्मा देवता।।

भूरादि सप्त व्याहृतीनां - अत्रि भृगु कुथ्स वसिष्ठ गौतम काश्यप अङ्गिरस ऋषयः।।

गायत्र्युष्णिक् अनुष्टुप् बृहती पङ्क्ति त्रिष्टुप् जगत्यः छन्दांसि।।

अग्नि वायु अर्क वागीश वरुणेन्द्र विश्वेदेवा देवताः।।

गायत्रीशिरसः - ब्रह्मा ऋषिः। अनुष्टुप्छन्दः। परमात्मा देवता।।

ओं भूः। .....भूर्भुवस्सुवरोम्।। (१० वार)

०७. गायत्र्यावाहनम्।।

आयात्वित्यनुवाकस्य-

वामदेव ऋषिः। अनुष्टुप्छन्दः। गायत्री देवता।। गायत्र्यावाहने विनियोगः।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

आयातु वरदा देवी अक्षरं ब्रह्म सम्मितम्। गायत्रीन्छन्दसां मातेदं ब्रह्म जुषस्वनः। ओजोऽसि सहोऽसि बलमसि भ्राजोऽसि देवानान्धाम नामासि विश्वमसि विश्वायु स्सर्वमसि सर्वायुरभिभूरों गायत्रीमावाहयामि सावित्रीमावाहयामि सरस्वती-मावाहयामि।।

सावित्र्या ऋषिः विश्वामित्रः। नृचिद्गायत्री छन्दः। सविता देवता।।

०८. करन्यासः।।

तथ्सवितुः ब्रह्मात्मने अङ्गुष्ठाभ्यां नमः।
वरेण्यं विष्णवात्मने तर्जनीभ्यां नमः।
भर्गो देवस्य रुद्रात्मने मद्ध्यमाभ्यां नमः।
धीमहि ईश्वरात्मने अनामिकाभ्यां नमः।
धियो यो नः सदाशिवात्मने कनिष्ठिकाभ्यां नमः।
प्रचोदयात् सर्वात्मने करतलकरपृष्ठाभ्यां नमः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

०८. अङ्गन्यासः।।

तथ्सवितुः ब्रह्मात्मने हृदयाय नमः।
वरेण्यं विष्णवात्मने शिरसे स्वाहा।
भर्गो देवस्य रुद्रात्मने शिखायै वषट्।
धीमहि ईश्वरात्मने कवचाय हुम्।
धियो यो नः सदाशिवात्मने नेत्रत्रयाय वौषट्।
प्रचोदयात् सर्वात्मने अस्त्राय फट्।
भूर्भुवस्सुवरों इति दिग्बन्धः।।

०९. गायत्री ध्यानम्।।

मुक्ताविद्रुम हेमनील धवळच्छायै-र्मुखै-स्त्रीक्षणै र्युक्ता-
मिन्दु(कला) निबद्ध रत्नमकुटां तत्त्वार्थ वर्णात्मिकाम्।
गायत्रीं वरदाभयाङ्कुशकशा-श्शुभ्रं कपालं गुणं
शंखं चक्रमथारविन्दयुगळं हस्तैर्वहन्तीं भजे।।

यो देवस्सविताऽस्माकं धियो धर्मादि गोचराः।
प्रेरयेत्तस्य यद्भर्गः तद्वरेण्यमुपास्महे।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

१०. गायत्री मन्त्रजपः।। *(१०८ वारं जपेत्)*

ओम्। भूर्भुवस्सुवः। तत्सवितुर्वरेण्यम्। भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्।।

११. उपस्थानम्।।

अङ्गन्यासं (पुटं १२- विषयः ०८)

भूर्भुवस्सुवरों इति दिग्विमोकः।। (कृत्वा)।।

ध्यानम्- (०९- पुटम् १२)।।

प्राणानायम्य।।

(प्रातः) - प्रातस्सन्ध्योपस्थानं करिष्ये।

(मद्ध्याह्ने) - आदित्योपस्थानं करिष्ये।

(सायं काले) - *सायं सन्ध्योपस्थानं करिष्ये*

(इति सङ्कल्प्य)

उत्तमे शिखरे देवी भूम्यां पर्वत मूर्द्धनि।
ब्राह्मणेभ्यो ह्यनुज्ञानं गच्छ देवि यथा सुखम्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

(प्रातः)-

मित्रस्य चरषणी धृतश्श्रवो देवस्य सानसिम्। सत्यञ्चित्रश्रवस्तमम्। मित्रो जनान् यातयति प्रजानन्मित्रो दाधार पृथिवीमुत द्याम्। मित्रः कृष्टीरनिमिषाऽभिचष्टे सत्याय हव्यङ्-घृतवद्विधेम। प्रसमित्र मर्तो अस्तु प्रयस्वान् यस्त आदित्य शिक्षति व्रतेन। न हन्यते न जीयते त्वोतो नैनमꣳहो अश्नोत्यन्तितो न दूरात्।।

(मद्ध्याह्ने)-

आसत्येन रजसा वर्तमानो निवेशयन्नमृतं मर्त्यञ्च। हिरण्ययेन सविता रथेनादेवो याति भुवना विपश्यन्। उद्वयन्तमसस्परि पश्यन्तो ज्योतिरुत्तरम्। देवन्देवत्रा सूर्यमगन्म ज्योतिरुत्तमम्।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

उ दुत्यञ्जातवेदसन्देव- व्वँहन्ति केतवः। दृशे विश्वाय सूर्यम्। चित्रन्देवाना-मुदगा-दनीक-ञ्चक्षु र्मित्रस्य वरुणस्याग्नेः। आप्राद्यावापृथिवी अन्तरिक्षꣳ सूर्य आत्मा जगतस्तस्थुषश्च। तच्चक्षु-र्देवहितं पुरस्ता-च्छुक्रमुच्चरत्। पश्येम शरदश्शत-ञ्जीवेम शरदश्शत-न्नन्दाम शरदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतꣳ शृणवाम शरदश्शतं प्रब्रवाम शरदश्शत-मजीतास्स्याम शरदश्शत-ञ्ज्योक्च सूर्यन्दृशे।।

य उदगा-न्महतोऽर्णवाद्विभ्राजमान-स्सरिरस्य मद्ध्यात्समा वृषभो लोहिताक्ष-स्सूर्यो विपश्चि-न्मनसा पुनातु।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

(सायं काले)-

इमं मे वरुण श्रुधीहवमद्या च मृडय। त्वामवस्युराचके। तत्त्वा यामि ब्रह्मणा वन्दमान-स्तदाशास्ते यजमानो हविर्भिः। अहेडमानो वरुणेह बोद्ध्युरुशꣳस मा न आयुः प्रमोषीः। यच्चिद्धि ते विशो यथा प्रदेव वरुण व्रतम्। मिनीमसि द्यविद्यवि। यत्किञ्चेद-ँवरुणदैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि। अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः। कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म। सर्वा ता विष्य शिथिरेव देवाथा ते स्याम वरुण प्रियासः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

१२. दिग्देवता वन्दनम्।।

सन्ध्यायै नमः। सावित्र्यै नमः। गायत्र्यै नमः। सरस्वत्यै नमः। सर्वाभ्यो देवताभ्यो नमः।

कामोऽकारषीन्मन्युरकार्षीन्नमो नमः।

१३. अभिवादनम्।।

अभिवादये.....त्र्यार्षेय (पञ्चार्षेय) प्रवरान्वित .... गोत्रः .....सूत्रः (यजुश्शाखा) अद्ध्यायी श्री..... शर्मा नामाहमस्मि भोः।।

१४. दिग्वन्दनम्।।

प्राच्यै दिशे नमः। दक्षिणायै दिशे नमः। प्रतीच्यै दिशे नमः। उदीच्यै दिशे नमः।।

ऊर्द्ध्वाय नमः। अधराय नमः। अन्तरिक्षाय नमः। भूम्यै नमः। विष्णवे नमः। ब्रह्मणे नमः। यमाय नमः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

(त्रिकालेऽपि - दक्षिणाभिमुखः)

यमाय धर्मराजाय मृत्यवे चान्तकाय च।
वैवस्वताय कालाय सर्वभूत क्षयाय च।।
औदुंबराय दध्नाय नीलाय परमेष्ठिने।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः।।
चित्रगुप्ताय वै नम ओन्नम इति।।

(त्रिकालेऽपि - उदङ्मुखः)

ऋतꣳसत्यं परं ब्रह्म पुरुषं कृष्ण पिङ्गलम्।
ऊर्द्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः।।

श्री विश्वरूपाय वै नमो नम ओन्नम इति।।

(प्रातःकाले मद्ध्याह्ने च प्राङ्मुखः। सायं काले प्रत्यङ्मुखः)

(नर्मदायै नमः प्राच्यै नर्मदायै नमो निशि।
नमोऽस्तु नर्मदे तुभ्यं त्राहि मां विषसर्पतः।।
जरात्कारो जरात्कार्वां समुत्पल्लो महायशाः।
अस्तीक-स्सत्यसन्धो मां पन्नगेभ्योऽभिरक्षतु।।
अपसर्प सर्प भद्रन्ते दूरं गच्छ महायशः।
जनमेजयस्य यज्ञान्ते अस्तीक वचनं स्मरन्)।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

नमस्सवित्रे जगदेक चक्षुषे
जगत्प्रसूति स्थिति नाशहेतवे।
त्रयीमयाय त्रिगुणात्म धारिणे
विरिञ्चि नारायण शङ्करात्मने।।

(अजाय लोकत्रय पावनाय
पूतात्मने गोपतये वृषाय।
सूर्याय भर्गप्रळयालयाय
नमो महाकारुणिकोत्तमाय।।
विवस्वते ज्ञानभृदन्तरात्मने
जगत्प्रदीपाय जगद्धितैषिणे।
स्वयंभुवे दीप्त सहस्रचक्षुषे
सुरोत्तमायामित तेजसे नमः।।)

ध्येयस्सदा सवितृमण्डल मद्ध्यवर्ति
नारायण सरसिजासन सन्निविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्द्धृत शङ्ख चक्रः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। त्रिकालसन्ध्या गायत्री जपविधिः ।।

शङ्ख चक्रगदापाणे द्वारका निलयाच्युत।
गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम्।।
आकाशात्पतितं तोयं यथा गच्छति सागरम्।
सर्वदेव नमस्कारः केशवं प्रतिगच्छति।।
केशवं प्रतिगच्छत्यों नम इति।।

अभिवाद्य।। आचम्य।।

अद्योनो देव सवितः प्रजावत्सावी स्सौभगम्।
परादुष्वप्नियꣳ सुव।। विश्वानि देवसवित र्दुरितानि
परा सुव। यद्भद्रन्तन्म आसुव।।

(इति जपस्थानं प्रोक्ष्य स्पृष्ट्वा हृदयमभिमृश्य- अपउपस्पृश्य)।।

कायेन वाचा मनसेन्द्रियैर्वा
बुद्ध्यात्मना वा प्रकृते स्स्वभावात्।
करोमि यद्यत्सकलं परस्मै
नारायणायेति समर्पयामि।।
ओं तत्सत् ब्रह्मार्पणमस्तु।।
आचामेत्।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। समिदाधानम् ।।

आचम्य ।। शुक्लांबरधरं ..... उपशान्तये ।।
ओं भूः ।..... भूर्भुवस्सुवरोम् ।।
ममोपात्त समस्त दुरिक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं
प्रातस्समिदाधानं (*सायं समिदाधान*) करिष्ये ।।

परित्वाऽग्ने परिमृजाम्यायुषा च धनेन च। सुप्रजाः
प्रजया भूयासꣳ सुवीरो वीरैः स्सुवर्चा वर्चसा
सुपोषः पोषै स्सुगृहो गृहै स्सुपतिः पत्या सुमेधा
मेधया सुब्रह्मा ब्रह्मचारिभिः ।।

(इत्यग्निं परितः परिमृज्य। तूषणीं समन्तं परिषिच्य) ।।

१. अग्नये समिधमाहार्षं बृहते जातवेदसे।
यथा त्वमग्ने समिधा समिद्ध्यस एवं मामायुषा
वर्चसा सन्या मेधया प्रजया पशुभि-र्ब्रह्मवर्चसेनान्ना-
द्येन समेधय स्वाहा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। समिदाधानम् ।।

२. एधोऽस्येधिषीमहि स्वाहा।

३. समिदसि समेधिषीमहि स्वाहा।

४. तेजोऽसि तेजो मयि धेहि स्वाहा।

५. अपो अद्यान्वचारिषꣳ रसेन समसृक्ष्महि। पयस्वाꣳ अग्न आऽगमन्तं मा सꣳ सृज वर्चसा स्वाहा।

६. संमाऽग्ने वर्चसासृज प्रजया च धनेन च स्वाहा।

७. विद्युन्मे अस्य देवा इन्द्रो विद्याथ्सहर्षिभिस्स्वाहा।

८. अग्नये बृहते नाकाय स्वाहा।

९. द्यावापृथिवीभ्याꣳ स्वाहा।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। समिदाधानम् ।।

१०. एषा ते अग्ने समित्तया वर्द्धस्व चाप्यायस्व च तयाऽहं वर्द्धमानो भूयासमाप्यायमानश्च स्वाहा।

११. यो माऽग्ने भागिनꣳसन्तमथाभागं-चिकीर्षति। अभागमग्ने तङ्कुरु मामग्ने भागिनङ्कुरु स्वाहा।

१२. समिधमाधायाग्ने सर्वव्रतो भूयासꣳस्वाहा।

१३. भूस्स्वाहा।

१४. भुवस्स्वाहा।

१५. सुवस्स्वाहा।

१६. ओं भूर्भुवस्स्वुवस्स्वाहा।

(अग्निं तूष्णीं परिसमूह्य - तूष्णीं परिषिच्य)

१७. स्वाहा। अग्नेरुपस्थानं करिष्ये।।(उत्थाय)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। समिदाधानम् ।।

यत्ते अग्ने तेजस्तेनाहन्तेजस्वी भूयास-य्यँत्ते अग्ने वर्चस्तेनाह-व्वँर्चस्वी भूयास-य्यँत्ते अग्ने हरस्तेनाहँ हरस्वी भूयासम्।।

मयि मेधां मयि प्रजां मय्यग्नि- स्तेजो दधातु मयि मेधां मयि प्रजां मयीन्द्र इन्द्रिय- न्दधातु मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु।।

अग्नये नमः।।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन।
यद्भुतन्तु मया देव परिपूर्णं तदस्तु ते।।
प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम्।।

(इत्युपस्थाय)

अभिवादये..अस्मि भोः।। (नमस्कृत्य। उपविश्य)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। समिदाधानम् ।।

रक्षा धारणम् ।।

मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। वीरान्मानो रुद्र भामितो वधीर्-हविष्मन्तो नमसा विधेमते।।

मेधावी भूयासम् - (ललाटे)
तेजस्वी भूयासम्- (दक्षिणेबाहौ)
वर्चस्वी भूयासम् - (सव्ये बाहौ)
ब्रह्मवर्चसी भूयासम् - (हृदये)
आयुष्मान् भूयासम् - (कण्ठे)
अन्नादो भूयासम् - (ककुदि)
स्वस्ति भूयासम् - (शिरसि)

श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम्। आयुष्यन्तेज आरोग्यं देहि मे हव्यवाहन।। देहि मे हव्यवाहनोन्नम इति।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। समिदाधानम् ।।

कायेन वाचा मनसेन्द्रियैर्वा

बुद्ध्यात्मा वा प्रकृतेस्स्वभावात्।

करोमि यद्यत्सकलं परस्मै

नारायणायेति समर्पयामि।।

मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन।

यद्भुतन्तु मया देव परिपूर्णं तदस्तु ते।

प्रयश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै।

यानि तेषामशेषेण कृष्णानुस्मरणं परम्।।

श्रीकृष्ण कृष्ण।।

ओं तत्सद्ब्रह्मार्पणमस्तु।। आचामेत्।।

।। इति समिदाधानविधिः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। यज्ञोपवीत धारणविधिः।।

आचम्य।। शुक्लांबरधरं.....उपशान्तये।।
ओं भूः।.....भूर्भुवस्सुवरोम्।।

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं श्रौतस्मार्त विहित सदाचार नित्य कर्मानुष्ठान योग्यता सिद्ध्यर्थं ब्रह्मतेजोऽभिवृद्ध्यर्थं यज्ञोपवीत धारणं करिष्ये।।

यज्ञोपवीत धारण महामन्त्रस्य - परब्रह्म ऋषिः। त्रिष्टुप्छन्दः। परमात्मा देवता।।

यज्ञोपवीत धारणे विनियोगः।।

ओं यज्ञोपवीतं परमं पवित्रं प्रजापते र्यत्सहजं पुरस्तात्।
आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः।

(इति उपवीतं धारयेत् - आचामेत्)

उपवीतं भिन्नतन्तुं जीर्णं कश्मल दूषितम्।
विसृजामि पुनर्ब्रह्मवर्चो दीर्घायुरस्तु मे।।

(इति पूर्वसूत्रमुद्धृत्य- जले विसृज्य - आचामेत्)

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ब्रह्मयज्ञविधिः ।।

आचम्य। शुक्लांबरधरं.....उपशान्तये।।

ओं भूः।.....भूर्भुवस्सुवरोम्।।

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं ब्रह्मयज्ञं करिष्ये। ब्रह्मयज्ञेन यक्ष्ये।।

विद्युदसि विद्यमे पाप्मानमृताथ्सत्यमुपैमि।।

(अपउपस्पृश्य)

(हस्तौ पादौ च आमणिबन्धनात् प्रक्षाळ्य।।

त्रिरपः पीत्वा। द्विः परिमृज्य। सकृदुपस्पृश्य। सव्यं पाणिं पादौ च प्रोक्ष्य। शिरः चक्षुषी नासिके श्रोत्रे हृदयं च प्रत्येकं सजलं स्पृष्ट्वा। दक्षिणोत्तर पाणी पादौ कृत्वा)।।

ओं ओंभूः। तथ्सवितुर्वरेण्यम्। ओं भुवः। भर्गो देवस्य धिमहि। ओ७सुवः। धियो यो नः प्रचोदयात्।।

ओं भूः। तथ्सवितुर्वेण्यं भर्गो देवस्य धीमहि।
ओं भुवः। धियो यो नः प्रचोदयात्।।

ओं ७ सुवः। तथ्सवितुर्वरेण्यं भर्गो देवस्य धीमहि।
धियो यो नः प्रचोदयात्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ब्रह्मयज्ञविधिः।।

(वेदादीन् जपेत्)

ओं अग्निमीळे पुरोहित य्यँज्ञस्य देवमृत्विजम्।

होतारं रत्न धातमम्।।

ओं इषेत्वोर्जे त्वा वायवस्थोपायवस्थ देवो वस्सविता

प्रार्पयतु श्रेष्ठतमाय कर्मणे।।

ओं अग्न आयाहि वीतये गृणानो हव्य दातये।

निहोता सथ्सि बर्हिषि।।

ओं शन्नो देवीरभिष्टय आपो भवन्तु पीतये।

शय्योरभिस्रवन्तु नः।।

(वेदमधीयीत - वेदस्थाने गायत्रीं वा जपेत्)

ओं नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम

ओषधीभ्यः। नमो वाचे नमो वाचस्पतये नमो विष्णवे

बृहते करोमि।। *(इति त्रिर्जपित्वा)*।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ब्रह्मयज्ञविधिः ।।

ओं तत्सत्। *(इत्युक्त्वा)।*

वृष्टिरसि वृश्च मे पाप्मानमृताथ्सत्यमुपागाम्।।

(इति अपउपस्पृश्य)।। (आचम्य)।।

देवर्षिपितृतर्पण विधिः।।

शुक्लांबरधरं...उपशान्तये।।

ओं भूः....सुवरोम्।।

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं देवर्षि पितृ तर्पणं करिष्ये।।*(इति संकल्प्य)*

(अपउपस्पृश्य)।

देव तर्पणम्।।

(उपवीती देवतीर्थेन देवान् सकृत् सकृत् तर्पयेत्)।।

ब्रह्मादयो ये देवाः तान्देवांस्तर्पयामि।

सर्वान्देवांस्तर्पयामि।

सर्वदेवगणांस्तर्पयामि।

सर्वदेवपत्नीस्तर्पयामि।

सर्वदेवगणपत्नीस्तर्पयामि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ब्रह्मयज्ञविधिः ।।

(अथ निवीती यज्ञोपवीतं अङ्गुष्ठयोस्सक्तं कृत्वा ऋषितीर्थेन द्वि द्विस्तर्पयेत्)।।

ऋषितर्पणम् ।।

कृष्णद्वैपायनादयो य ऋषयः तानृषीन् तर्पयामि।
सर्वानृषीन् तर्पयामि।
सर्व ऋषिगणान् तर्पयामि।
सर्व ऋषिपत्नीः तर्पयामि।
सर्व ऋषिगणपत्नीः तर्पयामि।
प्रजापतिं काण्डऋषिं तर्पयामि।
सोमं काण्डऋषिं तर्पयामि।
अग्निं काण्डऋषिं तर्पयामि।
विश्वान्देवान् काण्डऋषीन् तर्पयामि।
सांहितीर्देवता उपनिषदस्तर्पयामि।
याज्ञिकीर्देवता उपनिषदस्तर्पयामि।
वारुणीर्देवता उपनिषदस्तर्पयामि।
हव्यवाहं तर्पयामि।
विश्वान् देवान् काण्डऋषीन् तर्पयामि।
ब्रह्माणं स्वयंभुवं तर्पयामि।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ब्रह्मयज्ञविधिः।।

विश्वान् देवान् काण्डऋषीन् तर्पयामि।
अरुणान् काण्डऋषीन् तर्पयामि।
सदसस्पतिं तर्पयामि।
ऋग्वेदं तर्पयामि।
यजुर्वेदं तर्पयामि।
सामवेदं तर्पयामि।
अथर्ववेदं तर्पयामि।
इतिहास पुराणं तर्पयामि।
कल्पं तर्पयामि।।

दिव्यपितृ तर्पणम्।।

(अथ प्राचीनावीती पितृतीर्थेन पितृन् त्रिस्त्रिः तर्पयेत्)।।

सोमः पितृमान् यमोऽङ्गिरस्वान् अग्निः कव्यवाहन इत्यादयः ये पितरः तान् पितृन् तर्पयामि।
सर्वान् पितृन् तर्पयामि।
सर्वपितृगणान् तर्पयामि।
सर्वपितृपत्नीः तर्पयामि।
सर्वपितृगणपत्नीः तर्पयामि।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। ब्रह्मयज्ञविधिः।।

अदिव्यपितृ तर्पणम्।।

पितॄन् तर्पयामि।
पितामहान् तर्पयामि।
प्रपितामहान् तर्पयामि।
मातॄः तर्पयामि।
पितामहीः तर्पयामि।
प्रपितामहीः तर्पयामि।

मातामहान् तर्पयामि।
मातुः पितामहान् तर्पयामि।
मातुः प्रपितामहान् तर्पयामि।
मातामहीः तर्पयामि।
मातुः पितामहीः तर्पयामि।
मातुः प्रपितामहीः तर्पयामि।

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतं स्वधास्थ तर्पयत मे पितॄन्। तृप्यत तृप्यत तृप्यत।। ओं तत्सत्।। उपवीती। आचामेत्।।

इति ब्रह्मयज्ञविधिः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। काममन्यु मन्त्रजपः ।।

(आचम्य। पवित्रपाणिः। दर्भेष्वासीनः। दर्भान् धारयमाणः)।।

शुक्लांबरधरं...उपशान्तये।।

ओं भूः.....सुवरोम्।।

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं-

तदेवलग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव विद्याबलं दैवबलं तदेव लक्ष्मीपतेः अङ्घ्रियुगं स्मरामि।

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यस्स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरश्शुचिः मानसं वाचिकं पापं कर्मणा समुपार्जितं श्रीराम स्मरणेनैव व्यपोहति न संशयः श्रीराम राम तिथिर्विष्णुः तथा वारः नक्षत्रं विष्णुरेव च योगश्च करणं चैव सर्वं विष्णुमयं जगत्।।

श्रीगेविन्द गोविन्द गोविन्द आद्य श्रीभगवतः महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य अद्यब्रह्मणः द्वितीय परार्द्धे श्वेतवराह कल्पे वैवस्वत मन्वन्तरे अष्टाविंशतितमे कलियुगे प्रथमे पादे जम्बूद्वीपे भारतवर्षे भरतखण्डे मेरोः दक्षिणेपार्श्वे शालिवाहन शकाब्दे अस्मिन् वर्तमाने व्यावहारिके प्रभवादि षष्टि

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। काममन्यु मन्त्रजपः।।

संवथ्सराणां मद्ध्ये, (..१*..) नाम संवथ्सरे, दक्षिणायने, वरष ऋतौ, श्रावण मासे, शुक्लपक्षे, पौर्णमास्यां शुभतिथौ, (..२*..) वासरयुक्तायां, (..३*..) नक्षत्रयुक्तायां, शुभयोग शुभकरण एवं गुण विशेषण विशिष्टायां अस्यां पौर्णमास्यां शुभतिथौ-

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं तैष्यां पौर्णमास्यां अद्ध्यायोत्सर्जन अकरण प्रायश्चित्तार्थं संवथ्सर प्रायश्चित्तार्थं अष्टोत्तर सहस्रसंख्यया (१००८) काममन्यु महा मन्त्रजपं करिष्ये।। तैष्यां पौर्णमास्यां अद्ध्यायोत्सर्जन अकरण प्रायश्चित्तार्थं संवथ्सर प्रायश्चित्तार्थं अष्टोत्तरसहस्र संख्यया काममन्यु महामन्त्रजपं करिष्ये।।

प्राणायामः (१० वारं)।।

मन्त्रः- "कामोऽकार्षीन्मन्युरकार्षीन्नमो नमः"।।

(१००८ वारं जपेत्)

प्राणायामः(१)।। ओं तत्सद्ब्रह्मार्पणमस्तु।। पवित्रं विसृज्य-आचामेत्।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। उपाकर्म महासङ्कल्पः ।।

आचम्य। दर्भेष्वासीनः। दर्भान् धारयमाणः।। शुक्लांबरधरं.....उपशान्तये।। ओभूः....सुवरोम्।। ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं

तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव विद्याबलं दैवबलं तदेव लक्ष्मीपतेः अङ्घ्रियुगं स्मरामि।

अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा यस्स्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरश्शुचिः मानसं वाचिकं पापं कर्मणा समुपार्जितं श्रीराम स्मरणेनैव व्यपोहति न संशयः।

श्रीराम राम राम तिथिर्विष्णुः तथा वारः नक्षत्रं विष्णुरेव च योगश्च करणं चैव सर्वं विष्णुमयं जगत्। श्रीगोविन्द गोविन्द गोविन्द-

आद्य श्री भगवतः आदिविष्णोः आदिनारायणस्य अचिन्त्यया अपरिमितया शक्त्या भ्रियमाणस्य, महाजलौघस्य मद्ध्ये परिभ्रमतां अनेककोटि ब्रह्माण्डानां मद्ध्ये,

एकतमे पृथिव्यब्तेजः वाय्वाकाश अहङ्कारादि महदव्यक्तैः आवरणैः आवृते,

अस्मिन् महति ब्रह्माण्डकरण्डक मद्ध्ये,

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। उपाकर्म महासङ्कल्पः ।।

आधारशक्ति कूर्मानन्तादि अष्टदिग्गजोपरि प्रतिष्ठितस्य,

अतल वितल सुतल रसातल तलातल महातल पाताळाख्य लोकसप्तकस्य उपरितले, पुण्यकृतां निवासभूते,

भुवस्सुवः महर्जनः तपस्सत्याख्य लोकषट्कस्य अधोभागे, महानाळायमान फणिराजशेषस्य सहस्रफणामणि मण्डलमण्डिते,

दिग्दन्ति शुण्डादण्ड उत्तंभिते, पञ्चाशत्कोटि विस्तीर्णे, लोकालोक अचलेन वलयिते,

लवणेक्षु सुरा सर्पिः दधि क्षीर उदकार्णवैश्च परिवृते, जंबूप्लक्ष शाकशाल्मलि कुश क्रौञ्च पुष्कराख्य सप्तद्वीपानां मद्ध्ये, जंबूद्वीपे,

महासरोरुह रूप केसराकार त्रिकूट चित्रकूटादि अचल परिवृत कर्णिकाकार सुमेरुं अभितः, तदाधारभूते भूमण्डले, लक्षयोजन विस्तीर्णे,

महामेरु निषद हेमकूट हिमाचलानां, इळावृत हरिकिंपुरुष वर्षाणां च दक्षिणे, नवसहस्रयोजन विस्तीर्णे,

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। उपाकर्म महासङ्कल्पः ।।

इन्द्रकशेरु ताम्र गभस्तिमत् नाकसौम्य गन्धर्व चारण भरताख्य नववर्षात्मके भारतवर्षे

स्वर्णप्रस्थ चन्द्रयुक्त अजावर्ति रमणक मङ्गळ महारण पाञ्चजन सिंहळ लङ्काख्य नवखण्डात्मके भरतखण्डे-

स्वामिशैल अवन्ति कुरुक्षेत्र दण्डकारण्य मलयाचल- सम भूमद्ध्य रेखायाः- पूर्वदिग्भागे

श्रीशैलस्य आग्नेयदिग्भागे-

श्रीरामसेतु गङ्गयोः मद्ध्यप्रदेशे - परशुरामक्षेत्रे-

सकल जगथ्स्त्रष्टुः परार्द्धद्वय जीविनः ब्रह्मणः प्रथम परार्द्धे- पञ्चाशत् अब्दात्मके अतीते- द्वितीय परार्द्धे पञ्चाशत् अब्दादौ, प्रथमे संवथ्सरे, प्रथमे मासे, प्रथमे पक्षे, प्रथमे दिवसे, द्वितीये यामे, तृतीये मुहूर्ते -

स्वायंभुव स्वारोचिष उत्तम तामस रैवत चाक्षुषाख्येषु, षट्सु मनुषु व्यतीतेषु- सप्तमे वैवस्वत मन्वन्तरे, अष्टविंशतितमे-

कृत त्रेधा द्वापर कलियुगात्मके चतुर्युगे तत्र कलियुगे-

सौर चान्द्र सावन नक्षत्रमानैः अनुमिते-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। उपाकर्म महासङ्कल्पः ।।

प्रभवादीनां षष्ट्याः संवथ्सराणां मद्ध्ये (..*१..) नाम संवथ्सरे, दक्षिणायने, वरषर्त्तौ, श्रावणमासे, शुक्लपक्षे अद्य पौर्णमास्यां शुभतिथौ, (...*२..) वासरयुक्तायां, (...*३...) नक्षत्रयुक्तायां, शुभयोग शुभकरण एवङ्गुण विशेषेण विशिष्टायां अस्यां पौर्णमास्यां शुभतिथौ,

ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं

अनादि अविद्या वासनया प्रवर्तमाने- अस्मिन् महति संसारचक्रे- विचित्राभिः कर्मगतिभिः - विचित्रासु पशु पक्षि मृगादि योनिषु अनेकधा पुनः पुनः जनित्वा, केनापि पुण्यकर्म विशेषेण - इदानान्तींतन मानुष्ये द्विजन्म विशेषं प्राप्तवतः मम-

जन्माभ्यासात् जन्मप्रभृति एतत् क्षण पर्यन्तं बाल्ये वयसि कौमारे यौवने वार्द्धके च, जाग्रत् स्वप्न सुषुप्ति अवस्थासु, मनोवाक्काय कर्मेन्द्रिय ज्ञानेन्द्रिय व्यापारैः कामक्रोध लोभमोह मद मात्सर्यादिभिः संभावितानां -

समपातकानां, अतिपातकानां, उपपातकानां, सङ्करीकरणानां, मलिनीकरणानां, अपात्रीकरणानां, जातिभ्रंशकराणां, प्रकीर्णकानां,-

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। उपाकर्म महासङ्कल्पः ।।

ज्ञानतः सकृत्कृतानां अज्ञानतः असकृत्कृतानां, ज्ञानतोऽज्ञानतश्च अभ्यस्तानां, निरन्तर अभ्यस्तानां, चिरकाल अभ्यस्तानां, नवानां नवविधानां, बहूनां बहुविधानां, सर्वेषां पापानां सद्यः अपनोदनार्थं -

अश्वत्थनारायण सन्निधौ, देवब्राह्मण सन्निधौ, त्रयस्त्रिंशत् कोटि देवता सन्निधौ, श्रीविशालाक्षी समेत विश्वेश्वर स्वामि सन्निधौ, महागणपति सन्निधौ, सीता लक्ष्मण भरत शत्रुघ्न हनुमत्समेत श्रीरामचन्द्रस्वामि सन्निधौ, श्रीरुग्मिणी सत्यभामा समेत श्रीगोपालकृष्ण स्वामि सन्निधौ, हरिहरपुत्रस्वामि सन्निधौ, -

*समस्त पापक्षयार्थं श्रावण्यां पौर्णमास्यां अद्ध्यायोपाकर्म करिष्ये।। (*एवं द्विः)।।

तदंगं श्रावणी पौर्णमासी पुण्यकाले महानद्यां शिवगङ्गास्नानमहं करिष्ये।।

अतिक्रूर महाभाग कल्पान्त दहनोपम।
भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हति।।

गोविन्द नाम सङ्कीर्तनम्। गोविन्द गोविन्द।।

।। इति उपाकर्म महासङ्कल्पः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। काण्ड ऋषि तर्पणम् ।।

(आचम्य। पवित्रपाणिः। दर्भेष्वासीनः। दर्भान् धारयमाणः)।।

शुक्लांबरधरं.....उपशान्तये। ओंभूः.....सुवरोम्। अद्य पूर्वोक्त एवं गुण विशेषण विशिष्टायां अस्यां पौर्णमास्यां शुभतिथौ ममोपात्त समस्त दुरितक्षयद्वारा श्रीपरमेश्वर प्रीत्यर्थं श्रावणी पौर्णमासी पुण्यकाले अद्ध्यायोपाकर्मांगं प्रजापत्यादि काण्ड ऋषि तर्पणं करिष्ये।।

(तिलाक्षतान् गृहीत्वा, निवीती, त्रिस्त्रिः तर्पणं कुयात्)।।

प्रजापतिं काण्ड ऋषिं तर्पयामि।
सोमं काण्ड ऋषिं तर्पयामि।
अग्निं काण्ड ऋषिं तर्पयामि।
विश्वान् देवान् काण्ड ऋषीन् तर्पयामि।
सांहितीर्देवता उपनिषदः तर्पयामि।
याज्ञिकीदेवता उपनिषदः तर्पयामि।
वारुणीर्देवता उपनिषदः तर्पयामि।
ब्रह्माणं स्वयंभुवं तर्पयामि।
सदसस्पतिं तर्पयामि।

(ततः उपवीती - पवित्रं विसृज्य - आचामेत्)।।

****

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

।। गायत्री जपविधिः ।।

(आचम्य। पवित्रपाणिः। दर्भेष्वासीनः। दर्भान् धारयमाणः)।।

शुक्लांबरधरं.....उपशान्तये। ओंभूः.....सुवरोम्। तदेव लग्नं सुदिनं..... अस्मिन् वर्तमाने व्यावहारिके प्रभवादि षष्ट्याः संवथ्सराणां मद्ध्ये, (...*१) नाम संवथ्सरे, दक्षिणायने, वर्षर्त्तौ, श्रावणमासे, कृष्णपक्षे, प्रथमायां शुभतिथौ, (...*२...) वासरयुक्तायां, (...*३...) नक्षत्रयुक्तायां, शुभयोग शुभकरण एवं गुण विशेषण विशिष्टायां अस्यां प्रथमायां शुभतिथौ -

*मिथ्याधीत प्रायश्चित्तार्थं, दोषवत् अपतनीय प्रायश्चित्तार्थं, संवथ्सर प्रायश्चित्तार्थं अष्टोत्तरसहस्र संख्यया गायत्री महामन्त्र जपं करिष्ये।।

(*एवं द्विः सङ्कल्प्य)।।

प्रणवस्य ऋषिर्ब्रह्मा ....विश्वेदेवा देवताः।

प्राणायामः (१० वारं)।।

आयात्वित्यनुवाकस्य..... आयातु वरदा देवी.... आवाहयामि।। गायत्री मन्त्रजपः (१००८)।। प्राणायामः (१)।।

गायत्र्युपस्थानं करिष्ये। उत्तमे शिखरे देवी....यथासुखम्।। अभिवाद्य। नमस्कृत्य।। ओं तत्सद्ब्रह्मार्पणमस्तु।। (पवित्रं विसृज्य आचामेत्)।।

।। इति गायत्री जपविधिः।।

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.

Digitized by Arya Samaj Foundation Chennai and eGangotri

CC-0.Panini Kanya Maha Vidyalaya Collection.